'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 1st Semester Examination, 2022

## CC2-SANSKRIT (102)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

विभागः-कः

1. कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) दिलीप-सुदक्षिणयोः अपुत्रकतायाः कारणं किम् ? संतानलाभार्थं ताभ्यां किं कृतम्, इत्येतत् सर्वं 'रघुवंशम्' इति महाकाव्यस्य प्रथम-सर्गानुसारं विशदयत।

(ख) किं रघुवंशम् महाकाव्यं वा, न वा इति सविशदम् आलोचयत।

2. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) क्व सूर्य प्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

(ख) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥

3. वङ्गभाषायाम् आङ्गलभाषायां वा द्वयोः अनुवादः करणीयः – 3×2 = 6

(क) तं सन्तः श्रोतुमर्हन्ति सदसद् व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

(ख) व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः॥

(ग) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

4. संस्कृतभाषया देवनागरीलिप्या च द्वयोः संक्षिप्तोत्तरं प्रदेयम् – 3×2 = 6

(क) रघुवंशम् इति काव्यस्य प्रख्याातटीकाकाराणां नामानि तथा टीकानां नामानि लिखत।

(ख) ''सम्पद्-विनिमयेनोभौ दधतुर्भुवनद्वयम्''– अत्र 'उभौ' इति पदेन कौ बोद्धव्यौ ? भुवनद्वयं किम् ? तौ कथं सम्पद्विनिमयम् अकुरुताम् ?

(ग) 'स्वाहयेव हविर्भुजम्'– स्वाहा का ? कः किं निमित्तं हविर्भुक् इत्युच्यते ? अत्र 'स्वाहा' 'हविर्भुक्' इति पदद्वयेन कौ बोध्येते ?

विभागः-खः

5. संस्कृतभाषया देवनागरीलिप्या च <u>एकस्य</u> उत्तरं प्रदेयम् – 12×1 = 12

(क) ''न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः''– वाक्यस्यास्य वक्ता कः ? कं प्रति वक्तुः इयमुक्तिः ? किरातार्जुनीयम् इति महाकाव्ये वक्त्रा यदुक्तं तत् सर्वं प्रतिपादयत।

(ख) ''नारिकेलफलसम्मितं वचो भारवेः''– इति वचनस्य याथार्थ्यं सोदाहरणं प्रतिपादयत।

6. संस्कृतभाषया देवनागरीलिप्या च <u>एकस्य</u> व्याख्या कार्या – 6×1 = 6

(क) क्रियासु युक्तैर्नृपः चारचक्षुषः,
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तमसाधुसाधु वा
हितं मनोहारि च दुलर्भं वचः॥

(ख) अबन्धकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः॥

7. <u>एकस्य</u> श्लोकस्य पादपुरणं कुरुत – 6×1 = 6

(क) ..............................................
..............................................।
सदानुकूलेषु हि कुर्वते रतिं
..............................................॥

(ख) ..............................................
..............................................।
..............................................
वितन्यते तेन नयेन पौरुषम्॥

8. <u>द्वयोः</u> संक्षिप्तोत्तरं प्रदेयम् – 3×2 = 6

(क) चारचक्षुषः कः ? अत्र कः समासः ?

(ख) 'क्व भूपतीनां चरितं क्व जन्तवः'– अस्य वक्ता कः ? भूपतीनां चरितं कीदृशम् ?

(ग) 'अहो दुरन्ता बलवद्विरोधिता'– कः किमर्थं उक्तवान् उक्तिमिमाम् ?

——×——